National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 52-55
© 2026 NJHSR
www.sanskritarticle.com

**नारायण-चन्द्रः मेठ्याः**
शोधकर्ता,वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य-संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२,

.

**Correspondence:**
**नारायण-चन्द्रः मेठ्याः**
शोधकर्ता,वेलुडमठस्थितस्य रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य-संस्कृतदर्शनविभागे, हाओडामण्डले, पश्चिमवङ्गेषु, ७११२०२,

# प्रौढमनोरमायाः मङ्गलश्लोकविमर्शः

**नारायण-चन्द्रः मेठ्याः**

**शोधसारः—** श्रीमद्भट्टोजिदीक्षितविरचिता प्रौढमनोरमा अतीव प्रसिद्धा संस्कृतनभसि विशेषतो व्याकरणाकाशे। सिद्धान्तकौमुद्याः व्याख्यानरूपा भवति प्रौढमनोरमा। अस्याः मङ्गलश्लोके विचाराः बहवः सन्ति। ध्यायम् इत्यस्य कः अर्थः, कीदृशं ब्रह्म अत्र प्रतिपादितम्, गुरोः इत्यत्र एकवचनम् किमर्थम् इत्येते बहूनां प्रश्नानाम् उत्तरम् अस्मिन् प्रबन्धे चर्चितं मया।
**कूटशब्दाः—** प्रौढमनोरमा (*prauḍhamanoramā*), ध्यायम् (*dhyāyam*), स्मारम् (*smāram*), आभीक्ष्ण्यम् (*ābhīkṣṇyam*), वीप्सा (*vīpsā*), प्रौढत्वम् (*prauḍhatvam*)

**१. भूमिका—** ग्रन्थादौ ग्रन्थकारः ग्रन्थारम्भात्प्राक् ग्रन्थस्य निर्विघ्न-समाप्तये शिष्यशिक्षणाय च मङ्गलम् आचरति। तेन मङ्गलाचरणेन विघ्नानां नाशो भवति। विषये अस्मिन् समाप्तिकामो मङ्गलमाचरेत् इति श्रुतिः प्रमाणम्। "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाऽध्येतारश्च मङ्गलयुक्ता यथा स्युरिति" इति स्वग्रन्थे महाभाष्यकारेण कण्ठरवेण उक्तम् अस्ति । तत् यथार्थम् आचरितवान् श्रीमान् भट्टोजिदीक्षितः। प्रकृते प्रबन्धे अस्मिन् श्लोके ये व्याकरणगताः अंशाः सन्ति ते आलोच्यन्ते।

**२. शोधसमस्या—** प्रौढमनोरमाया मङ्गलश्लोके बहवो विचाराः सन्ति। यदा केवलं मूलं पठ्यते तदा काचिदपि समस्या नानुभयते इति तु सत्यम् किन्तु यदा तस्याः टीकाग्रन्थाः पठ्यन्ते तदा महती समस्या अनुभूयते छात्रैः। ग्रन्थानां बहुभिः आचार्यैः व्याख्या कृता अस्ति। तथापि बोधे क्लिष्टता अनुभूयते सुकुमारमतिभिः। अतः तेषां छात्राणां क्लिष्टतायाः निराकरणाय अस्मिन् प्रबन्धे स विषय आलोच्यते।

**३. शोधपद्धतिः—** एवं संशये प्रकृतप्रबन्धे मया काचित् विश्लेषणात्मिका प्रक्रिया अवलम्बिता। तत्र प्रथमं सिद्धान्तकौमुदी, ततः प्रौढमनोरमा अधीता। ततः प्रसिद्धाः केचन टीकाग्रन्थाः (शब्दरत्नम्, भैरवी) अधीताः। ततः तेभ्यः टीकाग्रन्थेभ्यः मतमाश्रित्य प्रबन्धोऽयं लिख्यते मया।

**४.मूलशोधः—**

प्रौढमनोरमायाः मङ्गलपद्यं हि—

**"ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः ।**
**सिद्धान्तकौमुदीव्याख्यां कुर्मः प्रौढमनोरमाम्॥"**[1]

**अन्वयः—** (वयं) ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः सिद्धान्तकौमुदीव्याख्यां प्रौढमनोरमाम् कुर्मः।

ध्यायं नाम ध्यात्वा ध्यात्वा। यदि ध्यायम् इति शब्दः घञन्तः, तस्य च द्वितीयायां ध्यायम् इति स्वीक्रियते तदा अभ्यासरूपकार्यस्य अनुत्पत्तिः भवति।

यतो हि घञ्प्रत्ययान्तस्य द्विर्वचने मानाभावः। तस्माच्च ज्ञायते ध्यायम् इति न घञन्तं रूपम् इति। इदं च णमुलन्तम्। अतः शब्दरत्ने उक्तम्—"णमुलन्तमेतत्"[2] इति। णमुल्प्रत्ययविधायकं सूत्रं भवति "आभीक्ष्ण्ये णमुल् च"[3] इति। प्रकृते चेन क्त्वाप्रत्ययस्य ग्रहणं भवति। एतेन ज्ञायते णमुल्प्रत्ययः क्त्वाप्रत्ययश्च आभीक्ष्ण्ये अर्थे भवतः। द्वावपि समानार्थकौ इति तदर्थः। तथाह्युक्तं शब्दरत्ने "ध्यात्वा ध्यात्वेत्यर्थः"[4] इति।

ध्यै चिन्तायाम् इति धातोः 'आभीक्ष्ण्ये णमुल् च' इति सूत्रेण णमुलि ध्यै+अम् इति जाते "आदेच उपदेशेऽशिति"[5] इति सूत्रेण ऐकारस्य आत्वे "आतो युक् चिण्कृतोः" इत्यनेन युगागमे ध्या+य्+अम् इति स्थिते वर्णसम्मेलनेन ध्यायम् इति रूपं निष्पन्नं भवति। प्रकृते आभीण्यपदस्य कोऽर्थः? पौनःपुन्यं हि आभीक्ष्ण्यार्थः। पौनःपुन्यम् इत्यर्थो हि क्रियानिष्ठः। तेन ध्यायम् इत्यस्यार्थो हि पौनःपुन्यविशिष्टध्यानम् इति। प्रकृते प्रत्ययार्थः विशेषणं किञ्च धात्वर्थः प्रकृत्यर्थो वा विशेष्यम् इति। ततः ध्यायम् इत्यस्य द्वित्वे सति ध्यायं ध्यायम् इति रूपं भवति। प्रकृते यद् द्वितं भवति तद्विषये मतद्वयं प्रदर्श्यते—

●प्रथमं मतं सिद्धान्तकौमुदीकारस्य भट्टोजिदीक्षितस्य। तन्मते प्रकृते नित्यवीप्सयोः इति सूत्रेण द्वित्वं भवति। सूत्रेऽस्मिन् नित्यशब्दः पारिभाषिकः। प्रकृते आभीक्ष्ण्यार्थकः नित्यशब्दः। तथाहि भाष्यकारः— नित्यशब्देन नित्यत्वं विवक्षितम् तच्च आभीक्ष्ण्यमिति। आभीक्ष्ण्यञ्च तिङन्तेषु अव्ययसंज्ञककृत्सु च ग्राह्यम्, तद्यथा—पचति पचति, भुक्त्वा भुक्त्वा इति। नीत्यवीप्सयोः इति सूत्रघटकवीप्सा-शब्दस्यार्थः व्याप्तुम् इच्छा इति। "नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा।"[6] यथा—वृक्षं वृक्षं सिञ्चतीति। प्रकृतमङ्गलपद्ये ब्रह्मणः सत्तायां सत्यां ध्यानं नापि भवितुम् अर्हति। तस्मात् भट्टोजिदीक्षितेन आभीक्ष्ण्यार्थे द्वित्वः कृतो वर्तते।

अत्र पौनःपुन्यविशिष्टध्यानमेव क्रियानिष्ठाभीक्ष्ण्यम्। अत्र च केषाञ्चित् आक्षेपो भवति आभीक्ष्ण्यार्थे द्वित्वं भवितुं नार्हति यतो हि णमुल्प्रत्ययेन आभीक्ष्ण्यार्थः उक्तः। तस्मात् उक्तार्थानाम् अप्रयोगः इति न्यायेन पुनः आभीक्ष्ण्यार्थे णमुल्प्रत्यययस्य मानाभावात्। अस्य आक्षेपस्य निराकरणम् एवं भवति— प्रकृतं स्थलं न उक्तार्थानाम् अप्रयोगः इति न्यायस्य विषयः। यतो हि अयं न्यायः प्रधानार्थविषये एव प्रवर्तते। प्रधानीभूतार्थे उक्ते सति अयं न्यायः प्रवर्तते इति तदर्थः। प्रकृतस्थले तु पुनः पुनः इत्याकारिकं यद् आभीक्ष्ण्यं तद् ध्यानक्रियायां विशेषणम्। तस्मात् ज्ञायते णमुल्पत्ययोक्तः अर्थः विशेषणीभूतः अप्रधानीभूतो वेति। अतः उक्तार्थानाम् अप्रयोगः इति न्यायः प्रकृते न प्रवर्तते। तेन आभीक्ष्ण्यार्थे द्विते कृते सति न दोषः।

●द्वितीयं मतं भवति सभापतिशर्मोपाध्यायस्य। तन्मते तु ध्यायं ध्यायम् इत्यत्र द्वित्वं क्रियासमभिव्याहारे द्वे वाच्ये इति वार्तिकेन भवति। क्रियासमभिव्याहारो भवति क्रियागतभृशार्थः, क्रियागतम् अतिशयित्वम् इति तदर्थः। प्रकृते ध्यायम् इत्यत्र पौनःपुन्यम् इति णमुल्प्रत्ययवाच्यः किञ्च अतिशयत्वं भवति द्वित्ववाच्यम्। एवं द्वयोः अर्थयोः भिन्नवाच्यत्वात् उक्तार्थानाम् अप्रयोगः इत्यस्य विषयो नास्ति। ध्यानगतभृशार्थं विना ब्रह्मणि तत्त्वमसिरूपा अखण्डप्रतीतिः सुतरां न भवति। तस्मात् अतिशयत्वम् अत्र आवश्यकम् एवेति।

शब्दरत्नकारः ध्यायमिति द्वितीयान्तं नास्ति इति दर्शयितुम् आह— "ध्यात्वा ध्यात्वा इत्यर्थः"[7] इति। यदि च ध्यायमिति द्वितियान्त-ब्रह्मपदस्य विशेषणं तर्हि अभ्यासानुपपत्तिः स्यात्, यतो हि ध्यानरूपार्थः अभेदेन ब्रह्मणि विशेषणं भवति। यस्माच्च क्रियाप्राधान्यार्थे एव आभीक्ष्णरूपः अभ्यासः भवति तस्माच्च क्रियाप्राधान्याभावात् प्रते आभीक्ष्णरूपः अभ्यासः अनुपपन्नः स्यात्। अत्र पुनः ध्यातव्यं यत् ध्यानरूपे ब्रह्मणि पुनः पुनः इत्यस्य अन्वयोऽपि न सम्भवति। तस्माच्च कारणात् पौनःपुन्यम् अनुपपन्नं भवति। ध्यायम् इति घञ्प्रत्ययान्तस्य ग्रहणं मा भूत् तदर्थम् अत्र शब्दरत्नकारेण ध्यात्वा ध्यात्वा इति निवेशितम्।

मङ्गलश्लोके परम् इति यत् पदमस्ति तस्यार्थो हि सर्वजगदुपादानम्[8] इति। तत् पदं किमर्थम् इति चेत् उच्यते "कार्यब्रह्महिरण्य-गर्भव्यावृत्ततये इदम्"[9] इति। यत् कार्यब्रह्म हिरण्यगर्भः तस्य बोधो यथा न स्यात् तदर्थम् परम् इति पदं निवेशितं ग्रन्थकारेण। यदि पुनः उच्यते ब्रह्म इति नपुंसकलिङ्गनिर्देशेन हिरण्यगर्भस्य व्यावृत्तिः स्यात् इति चेत् न, कार्यब्रह्मणः हिरण्यगर्भस्यापि नपुंसकलिङ्गनिर्देशेन बोधनात्। तद्यथा—

**"यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।**

**तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायाते ॥"**[10] इति।

यद्यपि अत्र ब्रह्म इति नपुंसकलिङ्गनिर्देशः अस्ति तथापि ब्रह्म इति हिरण्यगर्भस्य वाचकम्। तेन ज्ञायते कार्यब्रह्महिरण्यगर्भस्य व्यावृत्तये परम् इति पदम्।

स्मृ चिन्तायाम् इति धातुर्भवति स्मारम् इत्यत्र। पुनः ध्यायम् इत्यत्र धातुर्भवति ध्यै चिन्तायाम् इति। केचन आक्षिपन्ति द्वयोः धात्वोः समानार्थकत्वात् पुनरुक्तिदोषो भवति इति। तदा तस्य समाधानं भवति एवं— स्मृत्यनुकूलव्यापारो हि ध्यानम्। स्मरणं तु तज्जन्यम्। ध्यानजन्यम् इति तदर्थः। जन्यजनकभावरूपभेदसत्त्वात् न हि तत्र पुनरुक्तिदोषः।

"एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे"[11] इति वचनात् ज्ञायते गुरोः कृते स्वस्य कृते, ईश्वरस्य कृते च एकवचनं न प्रयोक्तव्यम् इति। किन्तु भट्टोजिदीक्षितः स्वस्य कृते बहुवचनम् 'कुर्मः' इति प्रयोगं करोति चेदपि गुरोः कृते 'गुरोर्गिरः' इति एकवचनमेव प्रयुङ्क्ते इति कृत्वा दोषः इति चेत् न। भट्टोजिदीक्षितः एकस्मात् एव गुरोः सर्वां विद्याम् अधिगतवान् इति बोधयितुम् एकवचनं प्रयुक्तवान्। तेन तस्य गुरोः सर्वविद्यापारङ्गत्वं सूचितम् अस्ति। तेन स्वगुरोः माहात्यम् एव कीर्तितम्, अतः न दोषो भवति।

**ग्रन्थनामसिद्धिः—** अस्य ग्रन्थस्य नाम भवति प्रौढमनोरमा इति। प्रौढानां मनांसि रमयति या सा प्रौढमनोरमा इति चेत् कर्मण्यण् इति सूत्रेण अण्प्रत्यये अणन्तत्वात् टिड्ढाणञ्.. इति सूत्रेण ङीप् स्यात्, तच्च नेष्टम्। तस्मात् शब्दरत्नकारेण "प्रौढानां मनः रमयति इत्यर्थिकां मनोरमाम्"[12] इत्युक्तम्। तेन अत्र फलितार्थः उक्तः न तु विग्रहः। अत्र कः विग्रहः इति चेत्— यथा धरतीति धरः, तत्पश्चात् गङ्गायाः धरः इति विग्रहे गङ्गाधरः इति रूपं सिद्ध्यति तथा रमयति या सा रमा,

तत्पश्चात् प्रौढानां रमा इति विग्रहे प्रौढमनोरमा इति सिद्ध्यति। पचादिगणे धर, रम इत्यादिनां स्वतन्त्रः पाठः अस्ति। तस्मात् एतेषां शब्दानां पचादिगणे पाठात् आदौ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इति सूत्रेण अचि धरः, रमा इत्यादीनि रूपाणि सिद्ध्यन्ति। ततश्च षष्ठीतत्पुरुषसमासः क्रियते। सम्प्रति प्रौढमनसां रमा इति विग्रहे सति कर्मोपपदाभावात् कर्मण्यण् इति सूत्रेण कार्यं सुतरां न प्राप्नोति। अस्य सारश्च अयं भवति— प्रौढमनसां रमा इति विग्रहः किञ्च प्रौढानां मनांसि रमयति या सा प्रौढमनोरमा इति पूर्वोक्तस्य विग्रहस्य फलितार्थः इति।

वस्तुतस्तु प्रौढमनांसि रमयति इति विग्रहे कृतेऽपि न दोषः। यतो हि पचादिगणे शब्दानां द्वैविध्यं लभ्यते। तद्यथा— चलः, करः, रमः इति प्रथमं किञ्च भूधरः, मनोरमा इत्यादिविशिष्टः पाठः इति द्वितीयम्। अत्र प्रश्नः समुदेति सामान्यपाठेनैव सर्वाणि रूपाणि सिद्ध्यन्ति तर्हि कुतः पुनः विशिष्टः पाठः कृतः इति। तदा उच्यते बाधकबाधनार्थः इति। अर्थात् नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इति सूत्रस्य बाधकं कर्मण्यण् इति यत् सूत्रम्, तद्बाधनार्थम्। तेन ज्ञायते प्रौढमनांसि रमयति इति विग्रहे कृते सति कर्मण्यण् इति सूत्रेण अणि प्राप्ते पचादिगणे विशिष्टपाठकरणसामर्थ्यात् नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इति सूत्रेण अणः बाधो भवति। अणश्च अभावात् ङीपः अपि अभावः सुतरां भवति।

**प्रौढत्वम्—** प्रौढानां मनांसि रमयति इति यद् उक्तम् तत्र किं नाम प्रौढत्वम् इति चेत् उच्यते शब्दरत्नकारेण “प्रौढत्वञ्च सकलदर्शनार्थ-ज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम्” इति।

**५.शोधनिष्कर्षः—** अस्मिन् श्लोके ध्यायं नाम ध्यात्वा ध्यात्वा। तच्च णमुलन्तम्। अत्र पौनःपुन्यविशिष्टध्यानमेव क्रियानिष्ठाभीक्ष्ण्यम्। सिद्धान्तकौमुदीकारस्य भट्टोजिदीक्षितस्य मते नित्यवीप्सयोः इति सूत्रेण द्वित्वं भवति। सभापतिशर्मोपाध्यायस्य मते तु ध्यायं ध्यायम् इत्यत्र द्वित्वं क्रियासमभिव्याहारे द्वे वाच्ये इति वार्तिकेन भवति। मङ्गलश्लोके परम् इति यत् पदमस्ति तस्यार्थो हि सर्वजगदुपादानम् इति। भट्टोजिदीक्षितः एकस्मात् एव गुरोः सर्वां विद्याम् अधिगतवान् इति बोधयितुम् एकवचनं प्रयुक्तवान्। तेन तस्य गुरोः सर्वविद्यापारङ्गत्वं सूचितम् अस्ति। तेन स्वगुरोः माहात्यम् एव कीर्तितम्।

**६. उपसंहारः—** प्रौढमनोरमाग्रन्थस्य मङ्गलश्लोके ये विचाराः सन्ति ते अत्र प्रदर्शिताः सन्ति। इतः अधिकं व्याख्यानम् अपि सम्भवति अत्र। इतः अपि गभीरतया विचारः क्रियते चेत् अधिकविचाराः सम्भवन्ति अत्र।

**ग्रन्थसूची (Bibliography)**


1. व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमेतम्, द्वितीयोऽध्यायः, तृतीयखण्डः); पतञ्जलिः; गुरुप्रसादशास्त्री (सम्पादकः); राष्ट्रिय-संस्कृत-संस्थानम्; देहली; २००६
2. व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमेतम्, प्रथमोऽध्यायः, द्वितीयखण्डः); पतञ्जलिः; गुरुप्रसादशास्त्री (सम्पादकः); राष्ट्रिय-संस्कृत-संस्थानम्; देहली; २००६
3. प्रौढमनोरमा (लघुशब्दरत्न-ज्योत्स्ना-प्रभा-कुचमर्दिनी-विभाटीकोपेता), भट्टोजिदीक्षितः; सदाशिवशास्त्री (सम्पादकः); चौखम्बा-अमरभारती-प्रकाशन ; वाराणसी; १९८३
4. प्रौढमनोरमा (लघुशब्दरत्न-भावप्रकाशिका-भावबोधिनी-संस्कृत-हिन्दीव्याख्योपेता,पञ्चसन्धिपर्यन्ता); भट्टोजिदीक्षितः जयशङ्कर-लालत्रिपाठी (व्याख्याकारः, सम्पादकश्च); चौखम्बा-कृष्णदास-अकादमी; वाराणसी; २०१९
5. प्रौढमनोरमा (लघुशब्दरत्न-भैरवी-रत्नप्रभाव्याख्योपेता, अव्ययीभावान्ता); भट्टोजिदीक्षितः; सभापति-शर्मोपाध्यायः (व्याख्याकारः, सम्पादकश्च); वाणी-विलास-प्रकाशन; वाराणसी; २०५४ (वि.सं.)
6. प्रौढमनोरमा (लघुशब्दरत्न-रत्नप्रकाशिका भावप्रकाश-सरलाटीकोपेता, अव्ययीभावान्ता); भट्टोजिदीक्षितः गोपालशास्त्री-नेने (व्याख्याकारः,सम्पादकश्च); चौखम्भा-संस्कृत-संस्थान; वाराणसी; २००३; तृतीयसंस्करणम्
7. प्रौढमनोरमा (शब्दरत्न-बालप्रकाशिका-संस्कृतहिन्दीव्याख्योपेता, पञ्चसन्धिप्रकरणान्ता, प्रथमो भागः); भट्टोजिदीक्षितः; द्वारिका-प्रसाद-द्विवेदी (व्याख्याकारः, सम्पादकश्च); चौखम्बा-सुरभारती-प्रकाशन; वाराणसी; २०११-१२
8. दीक्षितःभट्टोजिः, वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्व-बोधिनीटीकोपेतः प्रथमो भागः), सम्पा. गिरिधरशर्मा परमेश्वरा-नन्दशर्मा च, दिल्ली मोतीलाल बनारसीदास, २०१२। मुद्रितम्।
9. दीक्षितः भट्टोजिः, वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्), सम्पा. गोविन्दाचार्यः, वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१७। मुद्रितम् ।
10. पतञ्जलिः, महाभाष्यम् (प्रथमाध्यायः), सम्पा. गुरुप्रसादः शास्त्री, दिल्ली : प्रतिभा प्रकाशन, १९९९। मुद्रितम्।
11. पतञ्जलिः, पाणिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्द्योतेन भाष्यप्रदीपेन च समुल्लसितम्), श्रीभार्गवशास्त्री, दिल्ली चौखम्बा संस्कृत प्रतिष्ठान, १९८७। मुद्रितम् ।
12. पाणिनिः, अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः), सम्पा. पुष्पादीक्षितः, नवदेहली; संस्कृतभारती, २०१०, प्रथममुद्रणम्। मुद्रितम् ।
13. दीक्षितः भट्टोजिः, प्रौढमनोरमा (बृहच्छब्दरत्न-लघुशब्दरत्न-टीकाद्वयसमलङ्कृतः), सम्पा. प्रो सीतारामशास्त्री, प्रकाशक. काशी-हिन्दु-विश्वविद्यालयः, वाराणसी, प्रथमं संस्करणम्, १९९२। मुद्रितम्।
14. Viśvanātha Kavirāja & Śivadatta Kavi. (1838). Sāhitya darpaṇa nām alaṅkāra sandarbha. Kṣemrāja Kṛṣṇadāsa Śreṣṭhī.

**पाद टिप्पणी:**

[1]प्रौढमनोरमा, पत्रसंख्या १

[2]प्रौढमनोरमा, पत्रसंख्या २

[3]अष्टाध्यायी, ३.४.२२

[4]प्रौढमनोरमा, पत्रसंख्या २

[5]अष्टाध्यायी, ६.१.४५

[6]काशिका, नित्यवीप्सयोः सूत्रवृत्तौ

[7]पौढमनोरमा, पत्रसंख्या २

[8]पौढमनोरमा, पत्रसंख्या ४

[9]पौढमनोरमा, पत्रसंख्या ४

[10]मुण्डकोपनिषत् १.१.९

[11]साहित्यदर्पणः, पत्रसंख्या ३७७

[12]प्रौढमनोरमा, पत्रसंख्या ५